# mankigItA from Bharatamanjari of Kshemendra

# મઙ્કિગીતા ભારતમઞ્જર્યાં ક્ષેમેન્દ્રવિરચિતા

## Document Information

Text title : mankigItA from Bharatamanjari of Kshemendra

File name : mankigItABM.itx

Category : giitaa, kShemendra

Location : doc_giitaa

Author : Kshemendra

Description/comments : kAvyamAlA 65. Bharatamanjari

Latest update : October 15, 2022

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 15, 2022

*sanskritdocuments.org*

# મઙ્કિગીતા ભારતમઞ્જર્યાં ક્ષેમેન્દ્રવિરચિતા

યાતે વૈફલ્યમારમ્ભે કિં કુર્યાદ્દ્રવિણોત્સુકઃ ।
એતત્પૃષ્ટઃ ક્ષિતિભુજા ધ્યાત્વા શાન્તનવોઽવદત્ ।
શ્રૂયતાં યદ્વિનષ્ટાર્થસમયે દુઃખભેષજમ્ ॥ ૧૩.૭૨૯॥

મઙ્કિર્નામ દ્વિજઃ પૂર્વમીહમાનોઽસકૃદ્ધનમ્ ।
પ્રયત્નૈરપિ ન પ્રાપ વિધિવૈમુખ્યહેલાય ॥ ૧૩.૭૩૦॥

ક્ષીણાર્થઃ સોઽર્થશેષેણ ક્રીત્વા ચાથ વૃષદ્વયમ્ ।
સ્વયમુત્કર્ષણં ચક્રે ક્ષેત્રે વિપુલવાહકઃ ॥ ૧૩.૭૩૧॥

અત્રાન્તરે પૃથુગ્રીવો નિદ્રાભઙ્ગાત્સમુત્થિતઃ ।
જહારોષ્ટ્રો મહાકાયસ્તૌ વૃષૌ સ્કન્ધલમ્બિનૌ ॥ ૧૩.૭૩૨॥

યુગોત્ક્ષેપાલ્લમ્બ્યમાનૌ તૌ તેન બલશાલિના ।
વૃષૌ વિલોક્ય શોકાર્તો વિલલાપ દ્વિજાત્મજઃ ॥ ૧૩.૭૩૩॥

અહો નુ ચિત્રવર્ણાઙ્ગૌ મમ વત્સતરૌ પ્રિયૌ ।
કર્ષન્વિભાતિ કરભો રત્નાઢ્યાવિવ ભૂષણૌ ॥ ૧૩.૭૩૪॥

ઇત્યુક્ત્વા જાતનિર્વેદગાઢવૈરાગ્યવાસનઃ ।
તૃષ્ણાં નિનિન્દ સહસા પ્રશાન્તાનુશયજ્વરઃ ॥ ૧૩.૭૩૫॥

દુઃખાય બત જન્તૂનાં તૃષ્ણા પરિભવાસ્પદમ્ ।
વિપ્રલબ્ધો જનઃ સર્વો યયા શોચત્યહર્નિશમ્ ॥ ૧૩.૭૩૬॥

અલબ્ધં વાઞ્છતાં વિત્તં લબ્ધં ચ પરિરક્ષતામ્ ।
નષ્ટં ચ શોચતાં પુંસાં કદા દુઃખં નિવર્તતે ॥ ૧૩.૭૩૭॥

કામોઽર્થેષુ વિપન્મૂલં સન્તોષઃ પરમં સુખમ્ ।
નિષ્કામશ્ચ સકામશ્ચ મતૌ મે સ્વસ્થરોગિણૌ ॥ ૧૩.૭૩૮॥

સધનશ્ચિન્ત્યતે રાજ્ઞા દસ્યુના સ્વજનેન ચ ।

વિકલશ્ચેતિ લોકેન નિર્ધનશ્ચ ન ગણ્યતે ॥ ૧૩.૭૩૯॥

તસ્માત્સન્ત્યક્તકામાનાં સન્તોષધનશાલિનામ્ ।
ક્ષયોદયવ્યયાયાસૈર્ન ચેતઃ પરિભૂયતે ॥ ૧૩.૭૪૦॥

ઇદં લબ્ધમિદં નષ્ટમિદં લપ્સ્યે પુનર્ધિયા ।
ઇદં ચિન્તયતામેવ જીર્ણમાયુઃ શરીરિણામ્ ॥ ૧૩.૭૪૧॥

અધુના લોભમુન્મૂલ્ય સ્પૃહાં દૂરે નિરસ્ય ચ ।
વીતમોહો ભવામ્યેષ મુનિસ્તુલ્યપ્રિયાપ્રિયઃ ॥ ૧૩.૭૪૨॥

ત્યાગો હિ હન્તિ વ્યસનં તથા હિ જનકઃ પુરા ।
દહ્યમાનેઽપિ નગરે નાભજદ્દુઃખવિક્રિયામ્ ॥ ૧૩.૭૪૩॥

ઇતિ ધ્યાત્વા ચિરં મઙ્કિર્નિર્વેદાચ્છાન્તમાનસઃ ।
આશાપાશં પરિત્યજ્ય પરં પદમવાપ્તવાન્ ॥ ૧૩.૭૪૪॥

ઇતિ ભારતમઞ્જર્યાં ક્ષેમેન્દ્રવિરચિતા મઙ્કિગીતા સમાપ્તા ।

---

*mankigItA from Bharatamanjari of Kshemendra*

pdf was typeset on October 15, 2022

Please send corrections to *sanskrit@cheerful.com*